# Shri Ramakrishna Ashtakam

# શ્રીરામકૃષ્ણાષ્ટકમ્

## Document Information

Text title : Shri Ramakrishna Ashtakam

File name : rAmakRRiShNAShTakam1.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTaka

Location : doc_deities_misc

Author : Swami Abhedananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણાષ્ટકમ્

શ્રીમદ્રામકૃષ્ણપાદાબ્જસુધાપાનોન્મત્તા રસિકા
ભાવુકાઃ પિબન્તુ સર્વકલ્યાણકરં, તન્નામામૃતં મુદા
વિશ્વસ્ય ધાતા પુરુષસ્ત્વમાદ્યો-
ઽવ્યક્તેન રૂપેણ તતં ત્વયેદમ્ ।
હે રામકૃષ્ણ, ત્વયિ ભક્તિહીને
કૃપાકટાક્ષં કુરુ દેવ નિત્યમ્ ॥ ૧॥

ત્વં પાસિ વિશ્વં સૃજસિ ત્વમેવ
ત્વમાદિદેવો વિનિહંસિ સર્વમ્ ।
હે રામકૃષ્ણ ત્વયિ ભક્તિહીને
કૃપાકટાક્ષં કુરુ દેવ નિત્યમ્ ॥ ૨॥

માયાં સમાશ્રિત્ય કરોષિ લીલાં
ભક્તાન્ સમુદ્ધર્તુમનન્તમૂર્તિઃ ।
હે રામકૃષ્ણ ત્વયિ ભક્તિહીને
કૃપાકટાક્ષં કુરુ દેવ નિત્યમ્ ॥ ૩॥

વિધૃત્ય રૂપં નરવત્ત્વયા વૈ
વિજ્ઞાપિતો ધર્મ ઇહાતિગુહ્યઃ ।
હે રામકૃષ્ણ ત્વયિ ભક્તિહીને
કૃપાકટાક્ષં કુરુ દેવ નિત્યમ્ ॥ ૪॥

તપોઽથ તે ત્યાગમદૃષ્ટપૂર્વં
દૃષ્ટ્વા નમસ્યન્તિ કથં ન વિજ્ઞાઃ ।
હે રામકૃષ્ણ ત્વયિ ભક્તિહીને
કૃપાકટાક્ષં કુરુ દેવ નિત્યમ્ ॥ ૫॥

શ્રુત્વાત્ર તે નામ ભવન્તિ ભક્તાઃ
દૃષ્ટ્વા વયં તન્નતુ ભક્તિયુક્તાઃ ।

હે રામકૃષ્ણ ત્વયિ ભક્તિહીને
    કૃપાકટાક્ષં કુરુ દેવ નિત્યમ્ ॥ ૬॥

સત્યં વિભું શાન્તમનાદિરૂપં
    પ્રસાદયે ત્વામજમન્તશૂન્યમ્ ।
હે રામકૃષ્ણ ત્વયિ ભક્તિહીને
    કૃપાકટાક્ષં કુરુ દેવ નિત્યમ્ ॥ ૭॥

જાનામિ તત્ત્વં ન હિ દેશિકેન્દ્રં
    કિં વા સ્વરૂપં કથમેવ ભાવમ્ ।
હે રામકૃષ્ણ ત્વયિ ભક્તિહીને
    કૃપાકટાક્ષં કુરુ દેવ નિત્યમ્ ॥ ૮॥

ઇતિ શ્રીઅભેદાનન્દસ્વામિનાવિરચિતં
    "જગદ્ગુરુશ્રીરામકૃષ્ણાષ્ટકં" સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Ramakrishna Ashtakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*